This Question Paper consists 35 questions and 4 printed pages.
अस्मिन् प्रश्नपत्रे 35 प्रश्नाः एवम् 4 मुद्रित पृष्ठाः सन्ति ।

Roll No.
अनुक्रमाङ्कः

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | |

Code No. 63/SS/A
गूढसंख्या

Set **A**
स्तबकः

# VEDA ADHYAYAN
## वेदाध्ययनम्
## (345)

Day and Date of Examination
(परीक्षादिवसः दिनाङ्कश्च) ____________________

Signature of Invigilators 1. ____________________
(निरीक्षकयोः हस्ताक्षरम्)
2. ____________________

**सामान्या निर्देशाः :**

1 अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपृष्ठे नूनं लेख्यः ।

2 निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां च संख्या प्रथमपृष्ठस्य प्रारम्भे प्रदत्तसंख्या समाना न वा । प्रश्नक्रमः सम्यग् न वा ।

3 वस्तुनिष्ठप्रश्नानाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम् ।

4 समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि ।

5 उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति ।

6 स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या 63/SS/A-A नूनं लेख्या ।

7 समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि ।



Unnati Educations
9899436384, 9654279279

# VEDA ADHYAYAN

## वेदाध्ययनम्

## (345)

**परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs)]** **[पूर्णाङ्काः (Full Marks) : 100**

**निर्देशाः :**

**(1)** अस्मिन् प्रश्नपत्रे **[A]** भागे **10**, **[B]** भागे **10**, **[C]** भागे **10**, **[D]** भागे **5** इति आहत्य **35** प्रश्नाः सन्ति ।

**(2)** प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काः × प्रश्नाः = पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति ।

**(3)** **सर्वे** प्रश्नाः **अनिवार्याः** ।

---

[A] दशानां युक्तं विकल्पं चिनुत । **1×10=10**

(1) वेदाङ्गानि भवन्ति ।

(क) त्रीणि (ख) षट्

(ग) पञ्च (घ) सहस्राणि

(2) निरुक्तं भवति ।

(क) मुखम् (ख) नासिका

(ग) श्रोत्रम् (घ) शिरः

(3) वेदानां सामवेदोऽस्मीति केन कीर्तितम् ।

(क) अर्जुनेन (ख) भीमेन

(ग) श्रीकृष्णेन (घ) भीष्मेण

(4) गिरिशन्त इति अभिधानं भवति ।

(क) रुद्रस्य (ख) इन्द्रस्य

(ग) वरुणस्य (घ) हिरण्यगर्भस्य

(5) विवास इति पदस्यार्थो भवति ।

(क) परिचर (ख) सञ्चर

(ग) उभयौ (घ) एकोऽपि न



Unnati Educations
9899436384, 9654279279

(6) अहस्तासः भवन्ति ।

(क) पर्वताः (ख) बाणाः

(ग) अक्षाः (घ) वृक्षाः

(7) मुखादिन्द्रश्चाग्निश्च __________ वायुरजायत ।

(क) उदराद् (ख) जठराद्

(ग) हृदयाद् (घ) प्राणाद्

(8) देवीसूक्तं दशममण्डलस्य कतमं सूक्तं भवति ।

(क) 125 तमम् (ख) 130 तमम्

(ग) 135 तमम् (घ) 140 तमम्

(9) पूर्वपदस्थः कुमारशब्दः कस्मिन् समासे प्रकृतिस्वरत्वं प्राप्नोति ।

(क) तत्पुरुषे (ख) अव्ययीभावे

(ग) कर्मधारये (घ) बहुव्रीहौ

(10) पित्प्रत्ययानां स्वरः कः भवति ।

(क) अनुदात्तः (ख) उदात्तः

(ग) स्वरितः (घ) अतिनीचोऽनुदात्तः

**[B]** दशानां यथानिर्देशम् उत्तराणि लघूनि लिखत । **2×10=20**

(1) व्याकरणशब्दस्य व्युत्पत्तिं लिखत ।

(2) अर्थववेदस्य कति उपनिषदः प्राप्यन्ते ?

(3) का नाम शिक्षा ? सामवेदस्य प्रसिद्धशिक्षाग्रन्थस्य नाम लिखत ।

(4) कति प्रस्थानानि ? कानि च तानि ?

(5) पुरुषसूक्तस्य कः ऋषिः ? किं च छन्दः ?

(6) निपाता आद्युदात्ता इति कीदृशं सूत्रम् ? कश्च स्वरोऽनेन विधीयते ?

(7) सुगन्धितेजनाः इत्यत्र स्वरसाधनं कथं भवति ? किं सूत्रम् ?

(8) सूत्रं कतिविधम् ? कानि च तानि ?

(9) एकादेश उदात्तेनोदात्तः इति सूत्रस्यार्थम् उदाहरणं च लिखत ।

(10) गतिरनन्तर इति सूत्रस्य कोऽर्थः ? किञ्चोदाहरणम् ?



Unnati Educations
9899436384, 9654279279

**[C]** दश अनतिदीर्घोत्तरैः समाधत्त । **4×10=40**

(1) पाणिनीयशिक्षामाश्रित्य टीकां लिखत ।

(2) मुखं व्याकरणं स्मृतम् इत्यस्य तात्पर्यं विवृणुत ।

(3) तैत्तिरीयसंहितामाश्रित्य टीकां लिखत ।

(4) सहस्रशीर्षा इति पदेन कस्य परामर्शः इति मन्त्रद्वारेण समुल्लिखत ।

(5) सरमापणिसूक्तस्य संवादसूक्तत्त्वं प्रतिपादयत ।

(6) नमस्ते रुद्र मन्यवे इति मन्त्रं व्याख्यात ।

(7) सन्नतरस्वरविधायकं सूत्रं सोदाहरणं व्याख्यायताम् ।

(8) उपसर्गस्वरविधायकं सूत्रं सोदाहरणं व्याख्यायताम् ।

(9) संज्ञायामुपमानम् इति सूत्रस्य तात्पर्य्यं लिखत ।

(10) क॒त॒रक॑ठः, क॒त॒र॒क॒ठः इत्यनयोः स्वरविन्यासः कथमेवं भवति ?

**[D]** पञ्च दीर्घोत्तरैः समाधेयाः । **6×5=30**

(1) वैदिकयागसम्पादने केषां वेदाङ्गानामुपयोगो वर्तते इति समासेन लिखत ।

(2) उपत्वाग्ने दिवेदिवे इत्यस्य मन्त्रस्य पदपाठं स्वरसाधनं च कुरुत ।

(3) शिवशङ्कल्पसूक्तानुसारं मनसः स्वरूपं विशद्यताम् । अथवा शिवशङ्कल्पसूक्तस्य अन्तर्निहितं तात्पर्यं लिख्यताम् ।

(4) देवताद्वन्द्वे च इति सूत्रं सोदाहरणं व्याख्यात ।

(5) समासस्वरविधायकं सूत्रं सोदाहरणं व्याख्यात ।

---



Unnati Educations
9899436384, 9654279279